# 72 - द्विसप्ततितम दशकम्
# अक्रूरागमनम्

कंसोऽथ नारद गिरा व्रज वासिनं त्वां
आकर्ण्य दीर्ण हृदयस् स हि गान्दिनेयम् ।
आहूय कार्मुक मखच् छलतो भवन्तम्
आनेतु मेन महिनो दहिनाथ शायिन् ॥ ॥72-1॥

अक्रूर एष भवदंघ्रि परश् चिराय
त्वत् दर्श नाक्षम मना: क्षिति पाल भीत्या ।
तस्याज्ञयैव पुन रीक्षितु मुद्यतस् त्वां
आनन्द भार मति भूरि तरं बभार ॥ ॥72-2॥

सोऽयं रथेन सुकृती भवतो निवासं
गच्छन् मनोरथ गणांस् त्वयि धार्यमाणान् ।
आस्वादयन् मुहु रपाय भयेन दैवं
सम्प्रार्थयन् पथि न किञ्चि दपि व्यजानात् ॥ ॥72-3॥

द्रक्ष्यामि वेद शत गीत गतिं पुमांसं
स्प्रक्ष्यामि किंस्विदपि नाम परिष्व जेयम् ।
किं वक्ष्यते स खलु मां क्वनु वीक्षितस् स्यात्
इत्थं निनाय स भवन् मयमेव मार्गम् ॥ ॥72-4॥

भूय: क्रमा दभिविशन् भव दंघ्रि पूतं
वृन्दावनं हर विरिञ्च सुराभि वन्द्यम् ।
आनन्द मग्न इव लग्न इव प्रमोहे
किं किं दशान्तर मवाप न पङ्कजाक्ष ॥ ॥72-5॥

पश्यन् नवन्दत भवत् विहृति स्थलानि
पांसुष्व वेष्टत भवच् चरणाङ्कितेषु ।
किं ब्रूमहे बहुजना हि तदापि जाता:
एवं तु भक्ति तरला विरला: परात्मन् ॥ ॥72-6॥

सायं स गोप भवनानि भवच् चरित्र
गीता मृत प्रसृत कर्ण रसायनानि ।
पश्यन् प्रमोद सरितेव किलोह्य मान:
गच्छन् भवत् भवन सन्निधि मन्वयासीत् ॥ ॥72-7॥

तावत् ददर्श पशुदोह विलोक लोलं
भक्तोत्त मागति मिव प्रतिपालयन्तम् ।
भूमन् भवन्त मय मग्रज वन्त मन्त:
ब्रह्मानुभूति रस सिन्धु मिवोत्व मन्तम् ॥ ॥72-8॥

सायन्त नाप्लव विशेष विविक्त गात्रौ
द्वौ पीत नील रुचिराम्बर लोभनीयौ ।
नाति प्रपञ्च धृत भूषण चारु वेषौ
मन्दस्मितार्द्र वदनौ स युवां ददर्श ॥ ॥72-9॥

दूरात्रथात् समवरुह्य नमन्त मेनम्
उत्थाप्य भक्त कुल मौलि मथोप गूहन् ।
हर्षान् मिता क्षर गिरा कुशलानु योगी
पाणिं प्रगृह्य सबलोऽथ गृहं निनेथ ॥ ॥72-10॥

नन्देन साक ममितादर मर्चयित्वा
तं यादवं तदुदितां निशमय्य वार्ताम् ।

गोपेषु भूपति निदेश कथां निवेद्य
नाना कथाभि रिह तेन निशा मनैषी: ॥ ॥72-11॥

चन्द्रा गृहे किमुत चन्द्र भगा गृहे नु
राधा गृहे नु भवने किमु मैत्र विन्दे ।
धूर्तो विलम्बत इति प्रमदाभि रुच्चै:
आशङ्कितो निशि मरुत्पुरनाथ पाया: ॥ ॥72-12॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥